स्नवः, स्वेदः, स्वेदस्रावः. 2 स्रवः-वणं, स्यंदनं, निर्यासः, स्रावः. 3 निष्ठीवनं, उद्गारः, उद्वमनं.

**Exulcerate,** *v. t.* व्रणं उत्पद् c., क्षतं कृ 8 U: क्षण् 8 P. **-ion,** *s.* व्रणोत्पत्ति *f.*, क्षतोत्पादनं.

**Exult,** *v. i.* प्र-मुद् 1 A, उत्सिच् pass, अत्यंतं आनंद् 1 P or हृष् 4 P or उल्लस् 1 P. **-ant,** *a.* उत्सिक्त, प्रमुदित, परमहृष्ट, उल्लसित, सगर्व, उन्मत्त, सदर्प. **-ation,** *s.* प्रमोदः, उत्सेकः, उल्लासः, परमानंदः, परमाह्लादः, परमहर्षः, मदः, गर्वः, अवलेपः. **-ing,-ly,** *adv.* सप्रमोदं, सोल्लासं, सोत्सेकं, सगर्वं, सदर्पं.

**Exuviae,** *s.* निर्मोकः.

**Eye,** *s.* चक्षुस् *n.*, वि-,लोचनं, नेत्रं, नयनं,अक्षि *n.*, दृश् *f.*, दृष्टि *f.*, ईक्षणं-णा, दृशा. 2 ( View ) दृष्टि *f.*; 'in the e. s of the public' लोकदृष्ट्या. 3 रंध्रं, छिद्रं. 4 **Bud,** q. v.; 'corners of the e.' अपांगः-गं, नयनोपांतः; 'mind's e.' ज्ञानचक्षुस् *n.*, मनोमयं ज्ञानं; 'before one's e. s' समक्षं, साक्षात्, प्रत्यक्षं-क्षतः; oft. by पश्यत्; 'before my very e. s' पश्यतोपि मम; 'in my e. s' मम दृष्ट्या, मां प्रति. **-v. t.** निरिक्ष् 1 A, आ-अव-लोक् 1 A, 10,दृश् 1 P; *See* **See,** 'e. pupil' तारा, कनीनिका, तारका; 'e. beam' नयन-दृष्टि-पातः; 'e.-drop' नेत्रजलं, बाष्पबिंदुः, अश्रु *n.*; 'e.-brow' भ्रूः, भ्रूलता; 'e.-glass' उपनेत्रं-नयनं; 'e.-lash' पक्ष्मन् *n.*; 'e.-let, e.-hole' गवाक्षः, छिद्रं, रंध्रं; 'e.-lid' नेत्र-नयन-च्छदः; 'e. reach (shot)' चक्षुर्विषयः, नयनगोचरः-रं, दृक्पथः; 'e.-sore' अक्षिशूलं, चक्षुःपीडा; अक्षिगतः, द्वेष्यः; 'I am an e.-sore to him' आक्षिगतोहमस्य; 'e.-wink' नयनसंज्ञा-संकेतः, कटाक्षः, 'e. witness' प्रत्यक्षसाक्षिन् *m.*, दर्शिन् *m.*, साक्षाद् द्रष्टृ *m* **-less,** *a.* चक्षुर्हीन, अनयन, दृष्टिविकल. 2 अच्छिद्र.

**Eyot,** *s.* लघुद्वीपं.

---

# F.

**Fable,** *s.* कथा, आख्यायिका, उपाख्यानं, कल्पितकथा, पुरावृत्ताख्यानं,प्रबंधकल्पना. **-v. t.** मनसा कॢप् c. or रच् 10 or सृज् 6 P. **-Fabulous,** *a.* ऐतिहासिक (की *f.*), कथानिबद्ध, आख्यानकीर्तित. 2 अलीक मनःकल्पित, मनसा सृष्ट, काल्पनिक (की *f.*,) कृत्रिम. **-Fabulist,** *s.* कथारचकः, ऐतिहासिकः.

**Fabric,** *s.* भवनं, गृहं, हर्म्यं, मंदिरं, प्रासादः, धामन् *n.*, शाला. 2 निर्माणं, रचनं. 3 ऊति *f.*, पटाकारः. 4 **Cloth,** q. v. **-Fabricate,** *v. t.* निर्मा 3 A or 2 P or c. (मापयति), विरच् 10, कृ 8 U. कॢप् c., वि-धा 3 U, सृज् 6 P. 2 मनसा सृज् or कॢप् c., कपटेन-मिथ्या कॢप् c.; 'to f. evidence' कूटप्रमाणं निर्मा, कपटसाक्ष्यं कृ; *See* **Counterfeit. -ion,** *s.* कपटरचना, अलीकं, कृत्रिमनिर्माणं मनःकल्पना, कूटं. 2 निर्माणं, कल्पना-नं, रचना. **-or,** *s.* निर्मातृ *m.*, रचकः. 2 कूटकृत् *m.*

**Façade,** *s.* हर्म्यमुखं.

**Face,** *s.* मुखं, वदनं, आननं, वक्त्रं, आस्यं, तुंडं. 2 तलं, पीठं, पृष्ठं. 3 अवस्था, स्थिति *f.*, दशा; 'before one's f.' अग्रे, अग्रतः, पुरतः, समक्षं, प्रत्यक्षं, संमुखं-खे; 'long f.' विषण्णवदनं; 'f. to f.' मुखामुखि, संमुखं; 'in the f. of ' अनादृत्य, अविगणय्य; *See* 'in spite of; 'in the f. of so many difficulties' एवंविधान्यपि कृच्छ्राण्यविगणय्य;' turn away the f.' विमुखीभू; 'stand f. to f.' संमुखी-अभिमुखी-भू. **-v. t.** संमुखयति-अभिमुखयति (D.): प्रतिमुखी-संमुखी-अभिमुखी-भू 1 P, (with gen.), संमुखं स्था 1 P, अभिमुखं गम् 1 P; पर्यव-स्था 1 A. 2 संमुख-अभिमुख-प्रतिमुख. **-a.** भू 1 P, or by मुख-अभिमुख in comp.; 'a house f-ing the east' पूर्वाभिमुखं गृहं; 'stand f.-ing the east' प्राङ्मुखस्तिष्ठ; 'one who boldly f. s the enemy' अभ्यमित्र्यः; अभ्यमित्रीणः-यः. **-ed,** *a.* (*s.*) in comp.; 'moon-f.' चंद्रानना, इंदुमुखी. 2 पटाच्छन्न, अधिवस्त्रान्वित. **-less,** *a.* निर्मुख, आननहीन.

**Facet,** *s.* कणः, मुखं.

**Facetious,** *a.* विनोदिन्, परिहासशील, नर्मप्राय, सरस, रसवत्, हासोत्पादक, नर्म in comp. **-ly,** *adv.* सरसं, विनोदार्थं, परिहासपूर्वं. **-ness,** *s.* परिहासशीलता.

**Facile,** *a.* सुकर, सुसाध्य, अनायास; *See* **Easy.** 2 अनुकूल, अनुवर्तिन्. **-ity,** *s.* **Ease,** q. v. 2 लाघवं; 'f. of hand' हस्तलाघवं, क्षिप्रता, सहजता. **-Facilitate,**